## स्वनहसोर्वा । (६२/३२३९)

अनुपसर्गे इत्येव । स्वनहसोः अनुपसर्गयो[1]र्वा [2]अप् प्रत्ययो भवति । स्वनः, स्वानः । हसः, हासः । अनुपसर्गे [3]इति किम् ? प्रस्वानः । प्रहासः ॥

## यमः समुपनिविषु च । (६३/३२४०)

अनुपसर्गे वा इति[4] वर्तते । [5]सम् उप नि वि इत्येतेषु उपपदेषु [6]अनुपसर्गेऽपि यमे[7]र्वा अप् प्रत्ययो भवति । [8]घञोऽपवादः । संयमः, संयामः । उपयमः, उपयामः । नियमः, नियामः । वियमः, वियामः । अनुपसर्गात् खल्वपि––यमः, यामः ।

## नौ गदनदपठस्वनः । (६४/३२४१)

[9]अप् इत्येव । निशब्दे उपपदे [10]गद नद पठ स्वन इत्येतेभ्यः धातुभ्यः वा अप् प्रत्ययो भवति । घञोऽपवादः । निगदः, निगादः । निनदः, निनादः । निपठः, निपाठः । [11]निस्वनः, निस्वानः[12] ॥

## क्वणो वीणायां च । (६५/३२४२)

नौ वा अनुपसर्गे इति [13]वर्तते । क्वणतेः धातोः निपूर्वादनुपसर्गाच्च[14] [15]वीणायां वा अप् प्रत्ययो भवति । घञोऽपवादः । सोपसर्गार्थं [16]वीणाया ग्रहणम् । निक्वणः, निक्वाणः । अनुपसर्गात्––क्वणः, क्वाणः । [17]वीणायां खल्वपि––[18]कल्याणप्रक्वणा वीणा । एतेषु इति किम् ? [19]अतिक्वाणो वर्तते ॥

## नित्यं पणः परिमाणे । (६६/३२४३)

'पण व्यवहारे [20]स्तुतौ च' (धा.पा. ४३९), [21]अस्माद् [22]धातोर्नित्यमप् प्रत्ययो भवति परिमाणे गम्यमाने । नित्यग्रहणं [23]विकल्पनिवृत्त्यर्थम् । मूलकपणः । शाकपणः । संव्यवहाराय मूलकादीनां [24]यः परिमितो मुष्टिर्बध्यते, तस्येदम[25]भिधानम् । परिमाणे इति किम्? पाणः ॥

## मदोऽनुपसर्गे । (६७/३२४४)

मदेः धातोः अनुपसर्गात् अप् प्रत्ययो भवति । घञोऽपवादः । विद्यामदः । धनमदः । [26]कुलमदः । अनुपसर्गे इति किम् ? उन्मादः । प्रमादः ॥

---

1. धात्वोः इत्यधिकम् अ.ब.क.फ.ह. 2. अप्रत्ययो ब. 3. इत्येव ब.क. 4. च इत्यधिकम् ब.फ. 5. समादिषु उपपदेषु फ. 6. अनुपसर्गादपि फ. 7. धातोः इत्यधिकम् ब. 8. घञोऽपवादः नास्ति फ. 9. अप् वा इत्येव ह. 10. गदादिभ्यः फ. 11. निःस्वनः, निःस्वानः ब. 12. नौ इति किम् ? गादः इत्यधिकम् फ. 13. अनुवर्तते ब. 14. च नास्ति फ. 15. वीणाविषयात् ह.ड. 16. इदम् इत्यधिकम् ब, वीणाग्रहणम् अ. 17. वीणाविषयात् अ. फ, खल्वपि नास्ति फ. 18. कल्याणप्रक्वः किणः ह, कल्याणाः प्रक्वाणा वीणाः ब. 19. प्रक्वाणो वर्तते अ. 20. स्तुतौ च नास्ति अ. ड. फ. 21. घञि प्राप्ते इत्यधिकम् ह. 22. धातोः नास्ति फ. 23. विकल्पनिरासार्थम् फ. 24. यः नास्ति फ. 25. विज्ञानम् अ.क. 26. कुलमदः नास्ति ब.क.ह.